## वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। (९१/२०४६)

ह्रस्वे इति निवृत्तम्। वत्स उक्षन् अश्व ऋषभ इत्येतेभ्यः[1] तनुत्वे द्योत्ये ष्टरच्प्रत्ययो भवति। यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः तस्य तनुत्वे प्रत्ययः (म.भा. २.४२६)। वत्सतरः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रथमवया वत्सः, तस्य तनुत्वं द्वितीयवयःप्राप्तिः। तरुण उक्षा, तस्य तनुत्वं तृतीयवयःप्राप्तिः। अश्वेनाश्वायामुत्पन्नोऽश्वः, तस्य तनुत्वम् अन्यपितृकता। अनड्वान् ऋषभः, तस्य तनुत्वं [2]भारवहने मन्दशक्तिता॥

## किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्। (९२/२०४७)

किम् यत् तत् इत्येतेभ्यः प्रातिपदिकेभ्य द्वयोरेकस्य निर्धारणे[3] डतरच्प्रत्ययो भवति। निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः। [4]जात्या, क्रियया, गुणेन, सञ्ज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। कतरो भवतोः कठः। कतरो भवतोः कारकः। कतरो भवतोः पटुः। कतरो भवतोर्देवदत्तः[5]। यतरो भवतोः कारकः। यतरो भवतोः पटुः। यतरो भवतोर्देवदत्तः, ततर आगच्छतु। महाविभाषया चात्र [6]प्रत्ययो विकल्प्यते। को भवतोर्देवदत्तः,[7] स आगच्छतु। निर्धारणे इति [8]विषयसप्तमीनिर्देशः। द्वयोः इति [9]समुदायात् निर्धारणविभक्तिः। एकस्य इति [10]निर्देशः निर्धार्यमाणनिर्देशः॥

## वा बहूनां जातिपरिप्रश्ने डतमच्। (९३/२०४८)

किंयत्तदः इति वर्तते, निर्धारणे, एकस्य इति च। [11]बहूनाम् इति निर्धारणे षष्ठी। बहूनां [12]मध्ये एकस्य निर्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यः वा डतमच् प्रत्ययो भवति। [13]कतमो भवतां कठः। यतमो भवतां कठः, ततम आगच्छतु। वावचनम् अकजर्थम्। [14]यको भवतां कठः, सक आगच्छतु। महाविभाषा च [15]प्रत्ययविकल्पार्था अनुवर्तते [16]एव। को भवतां कठः। यो भवतां कठः, स आगच्छतु। जातिपरिप्रश्ने इति किम्? को भवतां देवदत्तः। परिप्रश्नग्रहणं च किम एव विशेषणं, न यत्तदोः, असम्भवात्। [17]जातिग्रहणं तु सर्वैरेव सम्बध्यते। किमोऽस्मिन् विषये डतरमपीच्छन्ति [18]केचित्, कतरो भवतां कालापः इति। तत्र 'कतरकतमौ जातिपरिप्रश्ने' (२.१.६३/७४२) इति वचनात् [19]सिद्धम्॥

## एकाच्च प्राचाम्। (९४/२०४९)

एकशब्दात् प्राचामाचार्याणां मतेन डतरच् डतमच् इत्येतौ प्रत्ययौ भवतः स्वस्मिन् विषये। चकारो डतरचोऽनुकर्षणार्थः। द्वयोर्निर्धारणे डतरच्, बहूनां निर्धारणे डतमच्। जातिपरिप्रश्ने इति नानुवर्तते। सामान्येन विधानम्। एकतरो भवतोर्देवदत्तः। एकतमो भवतां देवदत्तः। [20]प्राचांग्रहणं पूजार्थं, विकल्पोऽनुवर्तते एव॥

---

1. शब्देभ्यः तनुत्वोपाधिकेऽर्थे वर्तमानेभ्यः स्वार्थे ब.क.ड.फ.ह. 2. भारसहने क. 3. गम्यमाने इत्यधिकम् क.ह.फ. 4. जात्या नास्ति क. ड. ग. 5. यज्ञदत्तो वा इत्यधिकम् ड. 6. प्रत्ययविकल्पो भवति क. 7. यो भवतोः देवदत्तः इत्यधिकम् क.ह. 8. विषयनिर्देशः क.ह. 9. समुदायनिर्धारण° क. 10. निर्देशः नास्ति ड फ ह, द्वितीयनिर्धार्यमाणनिर्देशः क. 11. वाक्यमिदं नास्ति क. 12. मध्ये–गम्यमाने नास्ति क. 13. एकतमः क. 14. ककः ड. 15. प्रत्यय नास्ति क. 16. एव नास्ति फ. 17. एकग्रहणं तु ह. 18. केचित् नास्ति ड. 19. सिद्धः ड.ह. 20. प्राग्ग्रहणं क.